संस्कृतसामान्यम् ।     उपशास्त्री I     06-08-2020

अनिवार्यक्रम् ।

संस्कृतानुवादः (वाच्यपरिवर्तनम्) ।

1. हमलोगों ने दूध पीया → वयं दुग्धं अपिबाम । कर्तृवाच्ये ।
अस्माभिः दुग्धं पीतम् । कर्मवाच्ये ।
2. वे हँसेंगे → ते हसिस्यन्ति । कर्तृवाच्ये ।
तैः हसितव्यम् (हसनीयम्) । भाववाच्ये ।
3. शिक्षक ने मुझे बुलाया → शिक्षकः मामाह्वयत् । कर्तृवाच्ये ।
शिक्षकेनाहं आहूतः । कर्मवाच्ये ।
4. वे रामायण पढ़ेंगे → ते रामायणं पठिष्यन्ति । कर्तृवाच्ये ।
तैः रामायणं पठितव्यम् । कर्मवाच्ये ।
5. हमलोग अवश्य जाएँगे → वयं नूनं गमिष्याम: । कर्तृवाच्ये ।
अस्माभिः नूनं गन्तव्यम् । कर्मवाच्ये ।
6. मोहन मुझे देखे → मोहनः मां पश्यतु । कर्तृवा० ।
मोहनेनाहं द्रष्टव्यः । कर्मवा० ।
7. सीता को दूध पीना चाहिए - सीता दुग्धं पिबेत् । कर्तृ० ।
सीतया दुग्धं पातव्यम् । कर्म० ।
8. तुमलोगों को संस्कृत पढ़नी चाहिए - यूयं संस्कृतं पठेत । कर्तृ० ।
युष्माभिः संस्कृतं पठितव्यम् । कर्म० ।
9. तुम सत्य कहो - त्वं सत्यं कथय । कर्तृ० ।
त्वया सत्यं कथितव्यम् । कर्म० ।
10. सीता गंगा से जल लाएगी - सीता गङ्गात् जलं आनिष्यति । कर्तृ० ।
सीतया गङ्गात् जलं आनेतव्यम् । कर्मवा० ।
11. वे पत्र पढ़ेंगे - ते पत्रं पठिष्यन्ति । कर्तृवाच्ये ।
तैः पत्रं पठितव्यम् । कर्मवाच्ये ।

06-08-2020

डॉ० निर्मल कुमार झा (सं० प्राचार्यः) ।
रा० उ० सं० महावि० सुखसेना पूर्णियाँ ।

06-08-2020

संस्कृतसामान्यम् ।
अनिवार्यपत्रम् ।

उपशास्त्री II

कृत् प्रत्ययः (कृदन्तः) भाग-2

तव्य, अनीयर्, तथा यत् प्रत्ययः →

1. कर्तरि कृत् → कृत् प्रत्ययः कर्तरि स्यात् ।
कर्तर्यर्थे धातुना सह कृत्प्रत्ययः भवेत् ।
तिङ्-भिन्ने सति एते सर्वे प्रत्ययाः भवन्ति ।

2. तव्यत्तव्यानीयरः → धातोरेते प्रत्ययाः स्युः ।
केलिमर् उपसंख्यानम् ।

यथा- रचितव्यम्, रचनीयम्, चेतव्यः, चयनीयः आदयः ।

लोट्लकारे, विधिलिङ्गे तथा च लृट्लकारे भाववाच्यवाक्ये तथा कर्मवाच्ये तव्य, अनीयर् तथा यत् प्रत्ययस्य प्रयोगः भवति । यथा →

त्वं दुग्धं पिब - कर्तृवाच्ये ।
त्वया दुग्धं पातव्यम् - कर्मवाच्ये । } लोट् लकारे ।

सः हसेत् - कर्तृवाच्ये
तेन हसितव्यम् - भाववाच्ये } विधिलिङ्गे ।

सः गृहं गमिष्यति - कर्तृवाच्ये
तेन गृहं गन्तव्यम् - कर्मवाच्ये } लृट् लकारे ।

प्रायशः तव्यान्तः अनीयरन्तः प्रत्ययान्तः शब्दः नपुंसकलिङ्गे भवति ।

धातु + तव्य प्रत्ययः → भवितव्यम्, गन्तव्यम्, नेतव्यम्, कर्तव्यम्, पातव्यम् दातव्यम्, ज्ञातव्यम् आदयः ।

धातु + अनीयर् → भवनीयम्, गमनीयम्, नयनीयम्, करणीयम्, पानीयम्, दानीयम् ज्ञानीयम् आदयः ।

06-8-2020

डॉ० निर्मलकुमार झा, (सं० प्राचार्यः) ।
... परिणियाँ ।

06-08-2020

अनिवार्यपत्रम् । शास्त्री II

व्याकरणशास्त्रहेतवे साहित्यम् । श्लोकव्याख्या ।

"तस्मिन्नभिद्योतितबन्धुपद्मे प्रतापसंशोषितशत्रुपङ्के ।
बबन्ध सा नोत्तमसौकुमार्या कुमुद्वती भानुमतीव भावम् ॥"

सन्दर्भः → कालिदासकृते रघुवंशमहाकाव्ये इन्दुमत्याः स्वयंवरवर्णन-प्रसङ्गे एष श्लोकः आयाति ।

प्रसङ्गः → अत्र कविः अवन्तिराजानं प्रति इन्दुमत्याः निःस्पृहभावं सविशेषं प्रतिपादयति ।

अन्वयः → उत्तमसौकुमार्या सा अभिद्योतितबन्धुपद्मे प्रतापसंशोषितशत्रुपङ्के तस्मिन् कुमुद्वती भानुमती इव भावं न बबन्ध ।

शब्दार्थः व्याकरणञ्च → उत्तमसौकुमार्या – अतिकोमला, उत्तमं सौकुमार्यं यस्याः सा । अभिद्योतितबन्धुपद्मे → अभिद्योतितानि बन्धुपद्मानि येन स अभिद्योतितबन्धुपद्मः, तस्मिन् = उल्लसितबन्धुकमले । प्रतापसंशोषितशत्रुपङ्के → प्रतापेन संशोषिता शत्रवः एव पङ्काः येन सह, तस्मिन् = तेजसंशोषितरिपुकर्दमे । तस्मिन् = उज्जयिनीराजनि । कुमुद्वती = नलिनी । भानुमती = अंशुमती । भावं = मनः । इव = यथा । न = नहि । बबन्ध = निबद्धमभवत् ।

तात्पर्यः → सुनन्दया दर्शितः राजानं प्रति इन्दुमती आकर्षिता न भवति यथा नलिनी कमलविकासकं पङ्कशोषकं विलोक्य प्रफुल्लं न भवति ।

विशेषः → अस्मिन् श्लोके श्रृङ्गाररसः, वैदर्भीरीतिः, माधुर्यगुणः, उपमालङ्कारः, उपजाति छन्दश्च ।

06-08-2020

डॉ० निर्मल कुमार झा, (स० प्राचार्य
रा० उ० सं० महावि० सखसेना परिणायाँ